**संवर्धनीयाः कलाधारवृक्षाः |**

**(उपजातिवृत्तम् |)**

कुर्वन्ति सेवां च सतां हि वृक्षाः
चानुग्रहं ते सकलेषु नित्यम्
सद्यस्ककाले हि महत्त्वपूर्णाः
संवर्धनीयाः कलाधारवृक्षाः

नृत्यं च कुर्वन्ति सदैव वृक्षाः
गीतं च गायन्ति मुदैव वृक्षाः
लयेन तालेन युक्ता हि वृक्षाः
संवर्धनीयाः कलाधारवृक्षाः

रम्या मनोहारिण एव वृक्षाः
प्रवासिनानां सुखमेव वृक्षाः |
फलादिभिः प्राणिनां प्राणभूताः
संवर्धनीयाः कलाधारवृक्षाः ||

सन्तोलयन्त्येव विश्वं च वृक्षाः
बीजानि वृक्षेषु बीजेषु वृक्षाः |
ब्रह्माण्डहेतुप्रभवा हि वृक्षाः
संवर्धनीयाः कलाधारवृक्षाः ||